अष्टाक्षर श्रीराम मंत्र स्तोत्रं

अष्टाक्षर श्रीराम मंत्र स्तोत्रं

स सर्वं सिद्धिमासाद्य ह्यंते रामपदं व्रजेत् |
चिंतयेच्चेतसा नित्यं श्रीरामः शरणं मम || 1 ||

विश्वस्य चात्मनो नित्यं पारतंत्र्यं विचिंत्य च |
चिंतयेच्चेतसा नित्यं श्रीरामः शरणं मम || 2 ||

अचिंत्योऽपि शरीरादेः स्वातंत्र्येणैव विद्यते |
चिंतयेच्चेतसा नित्यं श्रीरामः शरणं मम || 3 ||

आत्माधारं स्वतंत्रं च सर्वशक्तिं विचिंत्य च |
चिंतयेच्चेतसा नित्यं श्रीरामः शरणं मम || 4 ||

नित्यात्मगुणसंयुक्तो नित्यात्मतनुमंडितः |
नित्यात्मकेलिनिरतः श्रीरामः शरणं मम || 5 ||

गुणलीलास्वरूपैश्च मितिर्यस्य न विद्यते |
अतोऽवाङ्मनसा वेद्यः श्रीरामः शरणं मम || 6 ||

कर्ता सर्वस्य जगतो भर्ता सर्वस्य सर्वगः |
आहर्ता कार्य जातस्य श्रीरामः शरणं मम || 7 ||

वासुदेवादिमूर्तीनां चतुर्णां कारणं परं |
चतुर्विंशति मूर्तीनां श्रीरामः शरणं मम || 8 ||

नित्यमुक्तजनैर्जुष्टो निविष्टः परमे पदे |
पदं परमभक्तानां श्रीरामः शरणं मम || 9 ||

महदादिस्वरूपेण संस्थितः प्राकृते पदे |
ब्रह्मादिदेवरूपैश्च श्रीरामः शरणं मम || 10 ||

मन्वादिनृपरूपेण श्रुतिमार्गं बिभर्तियः |
यः प्राकृत स्वरूपेण श्रीरामः शरणं मम || 11 ||

ऋषिरूपेण यो देवो वन्यवृत्तिमपालयत् |
योऽंतरात्मा च सर्वेषां श्रीरामः शरणं मम || 12 ||

योऽसौ सर्वतनुः सर्वः सर्वनामा सनातनः |
आस्थितः सर्वभावेषु श्रीरामः शरणं मम || 13 ||

बहिर्मत्स्यादिरूपेण सद्धर्ममनुपालयन् |
परिपाति जनान् दीनान् श्रीरामः शरणं मम || 14 ||

यश्चात्मानं पृथक्कृत्य भावेन पुरुषोत्तमः |
अर्चायामास्थितो देवः श्रीरामः शरणं मम || 15 ||

अर्चावतार रूपेण दर्शनस्पर्शनादिभिः |
दीनानुद्धरते योऽसौ श्रीरामः शरणं मम || 16 ||

कौशल्याशुक्तिसंजातो जानकीकंठभूषणः |
मुक्ताफलसमो योऽसौ श्रीरामः शरणं मम || 17 ||

विश्वामित्रमखत्राता ताटकागतिदायकः |
अहल्याशापशमनः श्रीरामः शरणं मम || 18 ||

पिनाकभंजनः श्रीमान् जानकीप्रेमपालकः |
जामदग्न्यप्रतापघ्नः श्रीरामः शरणं मम || 19 ||

राज्याभिषेकसंहृष्टः कैकेयी वचनात्पुनः |
पितृदत्तवनक्रीडः श्रीरामः शरणं मम || 20 ||

जटाचीरधरोधन्वी जानकीलक्ष्मणान्वितः |
चित्रकूटकृतावासः श्रीरामः शरणं मम || 21 ||

महापंचवटीलीला संजातपरमोत्सवः |
दंडकारण्यसंचारी श्रीरामः शरणं मम || 22 ||

खरदूषणविच्छेदी दुष्टराक्षसभंजनः |
हृतशूर्पणखाशोभः श्रीरामः शरणं मम || 23 ||

मायामृगविभेत्ता च हृतसीतानुतापकृत् |
जानकीविरहाक्रोशी श्रीरामः शरणं मम || 24 ||

लक्ष्मणानुचरोधन्वी लोकयात्राविडंबकृत् |
पंपातीरकृतान्वेषः श्रीरामः शरणं मम || 25 ||

जटायुगति दाता च कबंधगतिदायकः |
हनुमत्कृतसाहित्य श्रीरामः शरणं मम || 26 ||

सुग्रीवराज्यदः श्रीशो वालिनिग्रहकारकः |
अंगदाश्वासनकरः श्रीरामः शरणं मम || 27 ||

सीतान्वेषणनिर्मुक्तहनुमत्प्रमुखव्रजः |
मुद्रानिवेशितबलः श्रीरामः शरणं मम || 28 ||

हेलोत्तरितपाथोधिर्बलनिर्धूतराक्षसः |
लंकादाहकरो धीरः श्रीरामः शरणं मम || 29 ||

रोषसंबद्धपाथोधिर्लंकाप्रासादरोधकः |
रावणादिप्रभेत्ता च श्रीरामः शरणं मम || 30 ||

जानकी जीवनत्राता विभीषणसमृद्धिदः |
पुष्पकारोहणासक्तः श्रीरामः शरणं मम || 31 ||

राज्यसिंहासनारूढः कौशल्यानंदवर्धनः |
नामनिर्धूतनिरयः श्रीरामः शरणं मम || 32 ||

यज्ञकर्ता यज्ञभोक्ता यज्ञभर्तामहेश्वरः |
अयोध्यामुक्तिदः शास्ता श्रीरामः शरणं मम || 33 ||

प्रपठेद्यः शुभं स्तोत्रं मुच्येत भवबंधनात् |
मंत्रश्चाष्टाक्षरो देवः श्रीरामः शरणं मम || 34 ||

प्रपन्नः सर्वधर्मेभ्योः मामेकं शरणं गतः |
पठेन्निदं मम स्तोत्रं मुच्यते भव बंधनात् || 35 ||

इति बृहद्ब्रह्मसंहितांतर्गत अष्टाक्षर श्रीराम मंत्र स्तोत्रं |